(610) "जुड बन्धने" (VI-तुदादिः-1379. सक. सेट् पर.) कुटादिः 'जुट' इति केचित् पठन्ति।

'प्रेरणे जोडयेच्छे तु बन्धने-जुडतीति च ॥' (श्लो. 89) इति देवः।

जोडकः-डिका, जोडकः-डिका, जुजुडिषकः-षिका, जोजुडकः-डिका; जुडिता-त्री, जोडयिता-त्री, जुजुडिषिता-त्री, जोजुडिता-त्री; इत्यादीनि सर्वाणि रूपाणि तौदादिककुटतिवत् (204) बोध्यानि।

(611) "जुड प्रेरणे" (X-चुरादिः-1647. सक. सेट्. उभ.)

'प्रेरणे जोडयेच्छे तु बन्धने जुडतीति च ॥' (श्लो. 89) इति देवः।

जोडकः-डिका, जुजोडयिषकः-षिका; जोडयिता-त्री, जुजोडयिषिता-त्री; इत्यादीनि सर्वाणि रूपाणि चुदधातुवत् (542) ज्ञेयानि। [A]विजोडितः।

(612) "जुतृ भासने" (I-भ्वादिः-32. अक. सेट्. आत्म.)

ज्योतिरिति रूपसिध्यर्थं ज्युतृ इति केचित् पठन्ति।

जोतकः-तिका, जोतकः-तिका, जुजोतिषकः-जुजुतिषकः-षिका, जोजुतकः-तिका, जोतिता-त्री, जोतयिता-त्री, जुजोतिषिता-जुजुतिषिता-त्री, जोजुतिता-त्री; इत्यादीनि सर्वाणि रूपाणि कुकधातुवत् (197) बोध्यानि। [B]काननजोती, इति णिनिप्रत्ययान्तः।

(613) "जुष परितर्कणे" (X-चुरादिः-1835. सक. सेट्. उभ.)

आधृषीयः। 'परितर्कणम्=ऊहो हिंसा वा' इति. सि. कौमुदी। परितर्पणे इति क्षीरस्वामी। परितर्पणम्=तृप्तिक्रिया।

'जोषयेज्जोषतीत्येते युजादेः परितर्कणे ॥
प्रीतिसेवनयोरिष्टं तुदादेर्जुषते पदम्'। (श्लो. 180-181) इति देवः।

---

A. 'अकर्येण तेन समरेष्वविशोठितस्त्वं
संशुण्ठिताहितमदेन विजोडितोऽसि ॥' धा. का. 3.27.

B. 'पृदाकुजिद्वेगमयत्नतो ययौ वियोयुतत्काननजोतिनाऽध्वना ॥' धा. का. 1.5.